# श्रीमद् भागवत रसिक कुटुंब

## द्वादश ज्योतिर्लिंगः मंत्र

सौराष्ट्रदेशे विशदेऽतिरम्ये,
ज्योतिर्मयं(ञ्) चन्द्रकलावतंसम् |
भक्तिप्रदानाय कृपावतीर्णं(न्),
तं(म्) सोमनाथं(म्) शरणं(म्) प्रपद्ये || 1 ||

श्रीशैलशृङ्गे विबुधातिसङ्गे,
तुलाद्रितुङ्गेऽपि मुदा वसन्तम् |
तमर्जुनं(म्) मल्लिकपूर्वमेकं(न्),
नमामि संसारसमुद्रसेतुम् || 2||

अवन्तिकायां(म्) विहितावतारं(म्),
मुक्तिप्रदानाय च सज्जनानाम् |
अकालमृत्योः(फ्) परिरक्षणार्थं(म्),
वन्दे महाकालमहासुरेशम् || 3||

कावेरिकानर्मदयोः(फ्) पवित्रे,
समागमे सज्जनतारणाय |
सदैवमान्धातृपुरे वसन्तम्,
ओङ्कारमीशं(म्) शिवमेकमीडे || 4||

पूर्वोत्तरे प्रज्वलिकानिधाने ,
सदा वसन्तं(ङ्) गिरिजासमेतम् |
सुरासुराराधितपादपद्मं(म्),
श्रीवैद्यनाथं(न्) तमहं(न्) नमामि || 5||

याम्ये सदङ्गे नगरेऽतिरम्ये
विभूषिताङ्गं(म्) विविधैश्च भोगैः |
सद्भक्तिमुक्तिप्रदमीशमेकं(म्),
श्रीनागनाथं(म्) शरणं(म्) प्रपद्ये ||6 ||

महाद्रिपार्श्वे च तटे रमन्तं(म्),
सम्पूज्यमानं(म्) सततं(म्) मुनीन्द्रैः |
सुरासुरैर्यक्ष महोरगाढ्यैः(ख्),
केदारमीशं(म्) शिवमेकमीडे || 7||

सह्याद्रिशीर्षे विमले वसन्तं(ङ्),
गोदावरितीरपवित्रदेशे |
यद्धर्शनात्पातकमाशु नाशं(म्),
प्रयाति तं(न्) त्र्यम्बकमीशमीडे || 8||

सुताम्रपर्णीजलराशियोगे,
निबध्य सेतुं(म्) विशिखैरसंख्यैः |
श्रीरामचन्द्रेण समर्पितं(न्) तं(म्),
रामेश्वराख्यं(न्)  नियतं(न्) नमामि || 9||

यं(ण्) डाकिनिशाकिनिकासमाजे,
निषेव्यमाणं(म्) पिशिताशनैश्च |
सदैव भीमादिपदप्रसिद्दं(न्),
तं(म्) शङ्करं(म्) भक्तहितं(न्) नमामि || 10||

सानन्दमानन्दवने वसन्तम् ,
आनन्दकन्दं(म्) हतपापवृन्दम् |
वाराणसीनाथमनाथनाथं(म्),
श्रीविश्वनाथं(म्) शरणं(म्) प्रपद्ये || 11||

इलापुरे रम्यविशालकेऽस्मिन्,
समुल्लसन्तं(ञ्) च जगद्वरेण्यम् |
वन्दे महोदारतरस्वभावं(म्),
घृष्णेश्वराख्यं(म्) शरणम् प्रपद्ये || 12||

ज्योतिर्मयद्वादशलिङ्गकानां(म्),
शिवात्मनां(म्) प्रोक्तमिदं(ङ्) क्रमेण |
स्तोत्रं(म्) पठित्वा मनुजोऽतिभक्त्या,
फलं(न्) तदालोक्य निजं(म्) भजेच्च || 13||